# Rishibhih Proktam Kashikathasudhapanaphalam

# ऋषिभिः प्रोक्तं काशीकथासुधापानफलम्

## Document Information

Text title : Rishibhih Proktam Kashikathasudhapanaphalam

File name : kAshIkathAsudhApAnaphalam.itx

Category : shiva, shivarahasya, tIrthakShetra

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 13 | vAvRittashlokAH ||

Latest update : April 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2024

*sanskritdocuments.org*

# ऋषिभिः प्रोक्तं काशीकथासुधापानफलम्

ऋषय ऊचुः
काशीकथासुधापानात्सन्तोषो यादृशोऽभवत् ।
सन्तोषस्तादृशोऽस्माकं सुधापानेऽपि नो भवेत् ॥ ९॥

काशकथासुधापानं न कृतं येन सादरम् ।
स जीवन् मृत एवान्धः स नीचः पुल्कसादपि ॥ १०॥

यथा देवाः सुधां प्राप्य सुप्रीताश्च सुधाशनाः ।
काशीकथासुधां प्राप्य सुप्रीताःस्म तथा वयम् ॥ ११॥

विद्याः समग्राः सम्प्राप्य यथा प्रीता द्विजोत्तमाः ।
काशीकथासुधां प्राप्य सुप्रीताःस्म तथा वयम् ॥ १२॥

यथा नवनिधींल्लब्ध्वा सन्तुष्टोऽभूद्धनाधिपः ।
काशीकथासुधां प्राप्य सुप्रीताःस्म तथा वयम् ॥ १३॥

यथा शिवार्चनाल्लक्ष्मीं लब्ध्वा प्रीतो जनार्दनः ।
काशीकथासुधां प्राप्य सुप्रीताःस्म तथा वयम् ॥ १४॥

यथेशात्प्राप्य वैकुण्ठं सुप्रीतोऽभूज्जनार्दनः ।
काशीकथासुधां प्राप्य सुप्रीताःस्म तथा वयम् ॥ १५॥

यथा शिवार्चनाल्लब्ध्वा स्वर्गं प्रीतः शचीपतिः ।
काशीकथासुधां प्राप्य सुप्रीताःस्म तथा वयम् ॥ १६॥

यथा नवतृणं प्राप्य प्रीता गावः क्षुधातुराः ।
काशीकथासुधां प्राप्य सुप्रीताःस्म तथा वयम् ॥ १७॥

यथा प्रीतानि सस्यानि वृष्टिं प्राप्य यथाहितम् ।
काशीकथासुधां प्राप्य सुप्रीताःस्म तथा वयम् ॥ १८॥

यथा यथेष्टमन्नानि लब्ध्वा प्रीतः क्षुधातुरः ।

काशीकथासुधां प्राप्य सुप्रीताःस्म तथा वयम् ॥ १९॥

यथा कम्बलवस्त्राणि लब्ध्वा प्रीतो हिमातुरः ।
काशीकथासुधां प्राप्य सुप्रीताःस्म तथा वयम् ॥ २०॥

यथा यथेष्टं द्रविणं लब्ध्वा प्रीता धनैषिणः ।
काशीकथासुधां प्राप्य सुप्रीताःस्म तथा वयम् ॥ २१॥

यथा कामातुराः(न्) प्राप्य प्रीताः स्युर्नवयौवनाः ।
काशीकथासुधां प्राप्य सुप्रीताःस्म तथा वयम् ॥ २२॥

यथा पुत्रेषिणः पुत्रांल्लब्ध्वा प्रीताश्चिरायुषः ।
काशीकथासुधां प्राप्य सुप्रीताःस्म तथा वयम् ॥ २३॥

यथा पिता सुतान् दृष्ट्वा प्रीतो विद्यागुणोज्ज्वलान् ।
काशीकथासुधां प्राप्य सुप्रीताःस्म तथा वयम् ॥ २४॥

यथा विद्या द्विजं प्राप्य सुप्रीता शिष्टसम्मतम् ।
काशीकथासुधां प्राप्य सुप्रीताःस्म तथा वयम् ॥ २५॥

यथा सत्पात्रमालम्ब्य सुप्रीतो दानतत्परः ।
काशीकथासुधां प्राप्य सुप्रीताःस्म तथा वयम् ॥ २६॥

यथा चकोरः सुप्रीतो लब्ध्वा चन्द्रकालामृतम् ।
काशीकथासुधां प्राप्य सुप्रीताःस्म तथा वयम् ॥ २७॥

यथा शीतं जलं प्राप्य पान्थः प्रीतोऽर्कतापितः ।
काशीकथासुधां प्राप्य सुप्रीताःस्म तथा वयम् ॥ २८॥

सूतः
काश्यां शिवः स्वयं साक्षात्सच्चिदानन्दलक्षणः ।
तस्मिन्यस्य भवेद्भक्तिः स तु धन्यो महायशाः ॥ ३५॥

यः काशीं द्वेष्टि मूढात्मा स शिवं द्वेष्टि वस्तुतः ।
ततः स निरयं याति सवंश्यो नात्र संशयः ॥ ३६॥

तेषां काश्यां भवेच्छ्रद्धा नान्येषां सत्यमुच्यते ।
काशी यतः शिवः साक्षात्ततस्तत्प्रवणा जनाः ॥ ८५॥

निर्मुक्ताः पापसङ्घेभ्यो घोरेभ्यः सत्यमुच्यते ।
काशीकथासुधा विप्राः ! दुर्लभा दुर्लभापि सा ॥ ८६॥

सुलभा शिवभक्तानां शिवार्थकृतकर्मणाम् ।
काशीकथासुधां प्राप्य तपोध्यानसमाधिभिः ॥ ८७॥

तत्प्राप्त्यर्थं यतस्तेषामुपयोगः श्रुतिश्रुतः ।
काशीकथासुधां प्राप्य ये पिबन्ति मुहुर्मुहुः ॥ ८८॥

ते शिवानुगृहीतास्ते पूजनीया मनीषिभिः ।
काशीकथा शिवकथा सा कथा मोक्षदायिनी ॥ ८९॥

तस्यां कथाग्र्यां प्रीतिस्तु न शिवानुग्रहं विना ।
निष्कलं निर्गुणं ब्रह्म शिवः काशीति गीयते ॥ ९०॥

तस्यां प्रीतिरनन्तानां तपसां फलमुच्यते ।
ततस्तत्प्रीतिरुत्कृष्टा तपसां च फलं द्विजाः ॥ ९१॥

काशीमूर्तिः शिवस्यैव मूर्तिभेदेन तिष्ठति ।
काशीमूर्तिः शिवस्येति वदन्ति श्रुतयो मताः ॥ ९२॥

मूर्तयः सन्ति विविधाः शिवस्य परमात्मनः ।
तासु मूर्तिषु काश्येव शिवप्रियतमा स्मृता ॥ ९३॥

काशीमूर्तिं शिवाकारां शिवे दृष्ट्वा मनोरमाम् ।
शिवो दृष्ट्वा भवानीं च प्रीतो भवति सर्वथा ॥ ९४॥

॥ इति शिवरहस्यान्तर्गते ऋषिभिः प्रोक्तं काशीकथासुधापानफलं सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् उग्राख्यः सप्तमांशः । अध्यायः १३ । वावृत्तश्लोकाः ॥

- .. shrIshivarahasyam ugrAkhyaH saptamAMshaH . adhyAyaH 13 . vAvRRittashlokAH ..

Notes:

Ṛśi-s ऋषयः narrate their experience resulting from receiving the Nectareous Stories of Kāśī काशीकथासुधा from Sūta सूत; who in turn tells them that such interest in Kāśī काशी and stories related to it occurs only due to Grace of Śiva (Śivānugraha शिवानुग्रह). He further reveals that Kāśī काशी is an embodiment of Śiva शिव Himself.

Encoded and proofread by Ruma Dewan

*Rishibhih Proktam Kashikathasudhapanaphalam*

pdf was typeset on April 28, 2024

Please send corrections to *sanskrit@cheerful.com*